नारदाद्यैर्म्मुनिगणैः सेवितां भवसुन्दरीम् ।
त्रिवलीवलयोपेतनाभिनालम्बशालिनीम् ॥
रत्नद्वीपे महाद्वीपे सिंहासनसमन्विते ।
प्रफुल्लकमलारूढ़ां ध्यायेत्तां भवगेहिनीत् ॥”
इति तन्त्रसारे जगद्धात्रीध्यानम् ॥

रत्नधेनुः, स्त्री, (रत्ननिर्म्मिता धेनुः ।) महादानविशेषः । यथा,—
मत्स्य उवाच ।
“अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
रत्नधेनुरिति ख्यातं गोलोकफलदं नृणाम् ॥
पुण्यन्दिनमथासाद्य तुलापुरुषदानवत् ।
लोकेशावाहनं कृत्वा ततो धेनुं प्रकल्पयेत् ॥
भूमौ कृष्णाजिनं कृत्वा लवणद्रोणसंयुतम् ।
धेनुं रत्नमयीं कुर्य्यात् सङ्कल्प्य विधिपूर्व्वकम् ॥
स्थापयेत् पद्मरागाणामेकाशीतिं मुखे बुधः ।
पुष्परागशतं तद्वद्घोणायां परिकल्पयेत् ॥
ललाटे हैमतिलकं मुक्ताफलशतं दृशोः ।
भ्रूयुगे विद्रुमशतं शुक्ती कर्णद्वये स्मृते ॥
काञ्चनानि तु शृङ्गाणि शिरो वज्रशतात्मकम् ।
ग्रीवायां नेत्रपटलं गोमेदकसमन्वितम् ॥
इन्द्रनीलशतं पृष्ठे वैदूर्य्यशतपार्श्वकौ ।
स्फाटिकैरुदरं कार्य्यं सौगन्धिकशतान् कटिं ॥
खुरा हैममयाः कार्य्याः पुच्छं मुक्तावलीमयम् ।
सूर्य्यकान्तेन्दुकान्तौ च घ्राणं कर्पूरचन्दनैः ॥
कुङ्कुमानि च रोमाणि रौप्यं नाभिञ्च कारयेत् ।
गारुत्मतशतं तद्वदस्थीनि परिकल्पयेत् ॥
तथान्यानि च रत्नानि स्थापयेत् सर्व्वसन्धिषु ।
कुर्य्याच्छर्करया जिह्वां गोमयञ्च गुड़ात्मकम् ॥
गोमूत्रमाज्यञ्च तथा दधि दुग्धं स्वरूपतः ।
पुच्छाग्रे चामरं दद्यात् समीपे ताम्रदोहनम् ॥
कुण्डलानि च हैमानि भूषणानि च शक्तितः ।
कारयेद्देवमेवन्तु चतुर्थांशेन वत्सकम् ॥
तथान्यानि च सर्व्वाणि पादाश्चेक्षुमयास्तथा ।
नानाफलानि सर्व्वाणि पञ्चवर्णवितानकम् ॥
एवं विरचनं कृत्वा तद्वद्धोमाधिवासनम् ।
ऋत्विग्भ्यो दक्षिणां दत्त्वा धेनुमामन्त्रयेत्ततः ।
गुड़धेनुवदावाह्य इदञ्चोदाहरेत्ततः ॥
त्वं सर्व्वदेवगणधाम यतः पठन्ति
रुद्रेन्द्रविष्णुकमलासनवासुदेवाः ।
तस्मात् समस्तभुवनत्रयदेहयुक्ता
मां पाहि देवि भवसागरपीड्यमानम् ॥
आमन्त्र्य धेनुमभितः परिवर्त्य भक्त्या
दद्याद्द्विजाय गुरवे जलपूर्व्वकं ताम् ।
यः पुण्यमाप्य दिनमत्र कृतोपवासः
पापैर्व्विमुक्ततनुरेति पदं मुरारेः ॥
इति सकलविधिज्ञो रत्नधेनुप्रदानं
वितरति च विमानं प्राप्य देदीप्यमानम् ।
कलिकलुषविमुक्तो बन्धुभिः पुत्त्रपौत्त्रैः
स हि मदनस्वरूपः स्थानमभ्येति शम्भोः ॥”
इति मत्स्यपुराणे महादानानुकीर्त्तने रत्नधेनुप्रदानिको नाम २६२ अध्यायः ॥

रत्ननिधिः, पुं, खञ्जनपक्षी । इति त्रिकाण्डशेषः ॥

रत्नपारायणं, क्ली, (परायणमेव । अण् । रत्नस्य पारायणम् ।) सर्व्वरत्नस्थानम् । यथा,—
“समुद्रोपत्यका हैमी पर्व्वताधित्यका पुरी ।
रत्नपारायणं नाम्ना लङ्केति मम मैथिलि ! ॥”
इति भट्टिः ॥

रत्नप्रभा, स्त्री, (रत्नानां प्रभात्र ।) जिनानां नरकविशेषः । यथा,—
“रत्नशर्क रावालुकापङ्कधूमतमप्रभाः ।
महातमप्रभा चेत्यधोऽधो नरकभूमयः ॥”
इति हेमचन्द्रः ॥

रत्नमुख्यं, क्ली, (रत्नेषु मुख्यम् ।) हीरकम् । इति हेमचन्द्रः ॥

रत्नराट्, [ज्] क्ली, (रत्नेषु राजते इति । राज् + क्विप् ।) माणिक्यम् । इति राजनिर्घण्टः । रत्नश्रेष्ठञ्च ॥

रत्नवती, स्त्री, (रत्नानि सन्त्यस्यामिति । रत्न + मतुप् । मस्य वः । उगित्वात् ङीप् ।) पृथिवी । इति शब्दमाला ॥ (राज्ञो वीरकेलेः कन्या । यथा, कथासरित्सागरे । ८८ । ६ ।
“नन्दयन्त्यभिधानायां पत्न्यां तस्योदपद्यत ।
सुता रत्नवती नाम देवताराधनार्ज्जिता ॥”)
रत्नयुक्ते, त्रि ॥ (यथा, रघुः । ६ । ४ ।
“पराद्ध्यवर्णास्तरणोपपन्न-
मासेदिवान् रत्नवदासनं सः ॥”
फलप्रदे च त्रि । यथा, ऋग्वेदे । ३ । २८ । ५ ।
“धारत्नवन्तममृतेषु जागृविम् ॥”
“रत्नवन्तं रत्नशब्देन स्वर्गादिलक्षणमुत्तमं फलमभिधीयते तद्वन्तं फलप्रदम् ।” इति तद्भाष्ये सायणः ॥)

रत्नवर्द्धकं, क्ली, (रत्नानि वर्षितुं शीलमस्य । वृष् + “लषपतपदस्थेति ।” ३ । २ । १५४ । इति उकञ् ।) पुष्पकरथः । इति शब्दरत्नावली ॥ रत्नवर्षणशीले, त्रि ॥

रत्नसानुः, पुं, (रत्नानि सानौ प्रस्थे यस्य ।) सुमेरुपर्व्वतः । इत्यमरः । १ । १ । ५२ ॥

रत्नसूः, स्त्री, (रत्नानि सूते इति । सू प्रसवे + क्विप् ।) पृथिवी । इति हेमचन्द्रः । ४ । ३ ॥ (यथा, राजतरङ्गिण्याम् । १ । ४२ ।
“त्रिलोक्यां रत्नसूः श्लाघ्या तस्यां धनपतेर्हरित् ।
तत्र गौरीगुरुः शैलो यत्तस्मिन्नपि मण्डलम् ॥”
रत्नप्रसवकारिणि, त्रि । यथा, रघुः । १ । ६५ ।
“न मामवति सद्वीपा रत्नसूरपि मेदिनी ॥”)

रत्नाकरः, पुं, (रत्नानामाकरः उत्पत्तिस्थानम् ।) समुद्रः । इत्यमरः । १ । १० । २ ॥ (यथा, महाभारते । ३ । १०१ । २३ ।
“दुर्गं समाश्रित्य महोर्म्मिमन्तं
रत्नाकरं वरुणस्यालयं स्म ॥”)
रत्नोत्पत्तिस्थानञ्च ॥ (स्वनामख्यातकविविशेषः । यथा, राजशेखरकृतश्लोकः ।
“मा स्म सन्तु हि चत्वारः प्रायो रत्नाकरा इमे ।
इतीव स कृतो धात्रा कविरत्नाकरोऽपरः ॥”
स तु ध्वनिगाथापञ्जिका-वक्रोक्तिपञ्चाशिका-हरविजयादिग्रन्थप्रणेता । अमृतभानुसूनुर्विद्याधिपत्यपरनामायं कविः काश्मीरदेशेऽवन्तिवर्म्मणो राज्यकाले समुत्पन्नः । तथा च राजतरङ्गिण्याम् । ५ । ३६ ।
“मुक्ताकणः शिवस्वामी कविरानन्दवर्द्धनः ।
प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्म्मणः ॥”
अवन्तिवर्म्मराज्यकालस्तु ७७७ शकाब्दादारभ्य ८०६ शकाब्दपर्य्यन्तमासीदतस्तत्कालीन एवायं कविरिति ज्ञायते । रत्नाकरप्रणीतं हरविजयाभिधं पञ्चाशत्सर्गात्मकं महाकाव्यं काश्मीरेषु प्रसिद्धमस्ति ॥)

रत्नाङ्कः, पुं, (रत्नानामङ्कश्चिह्नं यस्मिन् ।) विष्णुरथः । इति शब्दरत्नावली ॥ (रत्नानामङ्कः ।) रत्नचिह्नञ्च ॥

रत्नाचलः, पुं, (रत्ननिर्म्मितः अचलः । शाकपार्थिववत् समासः ।) दानार्थमणिमयपर्व्वतः । यथा,—
“अतः परं प्रवक्ष्यामि रत्नाचलमनुत्तमम् ।
मुक्ताफलसहस्रेण पर्व्वतः स्यादनुत्तमः ॥
मध्यमः पञ्चशतिकस्त्रिशतेनाधमः स्मृतः ।
चतुर्थांशेन विष्कम्भाः पर्व्वताः स्युः समन्ततः ॥
पूर्व्वेण वज्रगोमेदैर्द्दक्षिणेनेन्द्रनीलकैः ।
पुष्परागयुतैः कार्य्यो विद्वद्भिर्गन्धमादनः ॥
वैदूर्य्यविद्रुमैः पश्चात् संमिश्रो विमलाचलः ।
पद्मरागसमो वर्णैरुत्तरेण तु विन्यसेत् ॥
धान्यपर्व्वतवत् सर्व्वमत्रापि परिकल्पयेत् ।
तद्वदावाहनं कृत्वा वृक्षान् देवांश्च काञ्चनान् ॥
पूजयेत् पुष्पपानीयैः प्रभाते चाथ पूर्व्ववत् ।
पूर्व्ववद्गुरुऋत्विग्भ्यः फलमन्त्रानुदीरयेत् ॥
यथा देवगणाः सर्व्वे सर्व्वरत्नेष्ववस्थिताः ।
त्वञ्च रत्नमयो नित्यमतः पाहि महाचल ! ॥
यस्माद्रत्नप्रदानेन तुष्टिं प्रकुरुते हरिः ।
सदा रत्नप्रदानेन तस्मान्नः पाहि पर्व्वत ॥
अनेन विधिना यस्तु दद्याद्रत्नं महागिरिम् ।
स याति वैष्णवं लोकममरेश्वरपूजितः ॥
यावत् कल्पशतं साग्रं वसेच्चेह नराधिप ।
रूपारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत् ॥
ब्रह्महत्यादिकं किञ्चिद्यदत्रामुत्र वा कृतम् ।
तत् सर्व्वं नाशमायाति गिरिर्व्वज्रहतो यथा ॥”
इति मात्स्ये ९० अध्यायः ॥

रत्नाभरणं, क्ली, (रत्नविशिष्टमाभरणम् ।) मणिमयालङ्करणम् । जड़ाओ गहना इति भाषा ॥ तस्य धारणगुणाः ।
“धन्यं यशस्यमायुष्यं श्रीमद्व्यसनसूदनम् ।
हर्षणं काम्यमौजस्यं रत्नाभरणधारणम् ॥”
इति राजवल्लभः ॥

रत्निः, पुं, (ऋच्छति प्राप्नोत्यनेनेति । ऋ + “ऋतन्यञ्जीति ।” उणा० ४ । २ । इति कत्निच् ।) बद्धमुष्टिहस्तः । इत्यमरः । २ । ६ । ८६ ॥ मुटुम् हात इति भाषा ॥ स्त्रीपुंसयो